This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

E

दाखल क्र. M-2645 विषय-वेद

नाव - ऐतरेय ब्राम्हण अस्टम पंचिका

लेखक - लिपीकार -

पृष्ठ /36 काळ - पुर्ण/अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2645

॥१॥

॥ अथ अष्टम

पांचीका प्रारंभः ॥

॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ अथातस्तुतशस्त्रयोरेवैकाहिकं प्रातःसवनं
मैकाहिकं तृतीयसवनमेते वै शांते क्लृप्ते प्रतिष्ठिते सवने यदैकाहिके
शांत्यै क्लृप्त्यै प्रतिष्ठित्या अप्रच्युत्या उक्तो माध्यंदिनः पवमानो य उभय
साम्नो बृहत्पृष्ठस्योभे हि सामनी क्रियेते आत्वा रथं यथोतय इदं वसो
सुतमंध इति राथंतरी प्रतिपद्राथंतरोनुचरः पवमानोक्थं वा एतद्य
न्मरुत्वतीयं पवमाने वा अत्र रथंतरं कुर्वंति बृहत्पृष्ठं सवीवधतायै त
दिदं रथंतरं स्तुतमाभ्यां प्रतिपदनुचराभ्यामनुशंसत्यथो ब्रह्म वै
रथंतरं क्षत्रं बृहद्ब्रह्म खलु वै क्षत्रात्पूर्वं ब्रह्म पुरस्तान्मउग्रं राष्ट्रमव्यथ्य

॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु

मसदित्यथान्नंवैरथंतरमन्नमेवास्मैतत्पुरस्तात्कल्पयत्यथेयंवैपृथिवीर
थंतरमियंखलुवैप्रतिष्ठाप्रतिष्ठामेवास्मैतत्पुरस्ताकल्पयतिसमानइंद्र
निहवोविभक्तःसोह्नांद्वान्ब्राह्मणस्यल्यउभयसाम्नोरूपंमुभेहिसाम
नीक्रियेतेसमान्योधाय्याअविभक्तास्ताअह्नामैकाहिकोमरुत्वतीयः
प्रगाथः॥१॥जनिष्ठाउग्रःसहसेतुरायेतिसूक्तमुग्रवत्सहस्वत्तत्क्षत्रस्य
रूपंमंद्रऊजिष्ठइत्योजस्वत्तत्क्षत्रस्यरूपंबहुलाभिमानऽइत्यभिवदति
भूत्यैरूपंतदेकादशर्चंभवत्येकादशाक्षरावैत्रिष्टुप्त्रैष्टुभोवैराजन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥

ऊजोवाइंद्रियंवीर्यंत्रिष्टुबोजःक्षत्रंवीर्यंराजन्यस्तदेनमोजसाक्षत्रेणवीर्येण
समर्धयतितद्गौरिवीतंभवत्येतद्वैमरुत्वतीयंसमृद्धंद्गौरिवीतंतस्योक्तंब्रा
ह्मणंत्वामिद्धिहवामहइतिबृहत्पृष्ठंभवतिक्षत्रंवैबृहत्क्षत्रेणैवतत्क्षत्रंस
मर्द्धयत्यथोक्षत्रंवैबृहदात्मायजमानस्यनिष्केवल्यंतद्यद्बृहत्पृष्ठंभव
तिक्षत्रंवैबृहत्क्षत्रेणैवैनंतत्समर्द्धयत्यथोज्यैष्ठ्यंवैबृहज्ज्यैष्ठ्येनैवैनं
तत्समर्द्धयत्यथोश्रैष्ठ्यंवैबृहच्छ्रैष्ठ्येनैवैनंतत्समर्द्धयत्यभित्वाशूरनोनु
मइतिरथंतरमनुरूपंकुर्वंत्ययंवैलोकोरथंतरमसौलोकोबृहदस्यवै

य२

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकस्यासौ लोकोनुरूपो मुष्य लोकस्यायं लोकोनुरूपस्तद्यद्रथंतरमनुरू
पं कुर्वंत्युभावेव तल्लोकौ यजमानाय संभोगिनौ कुर्वंत्यथो ब्रह्मवै रथंतरं क्षत्रं बृ
हद्ब्रह्मणि खलु वै क्षत्रं प्रतिष्ठितं क्षत्रे ब्रह्माथो साम्न ऽएव सयोनितायै यद्वावाने
ति धाय्या तस्या उक्तं ब्राह्मणमुभयं शृणवच्च न इति साम प्रगाथ ऽउभ साम्नो रू य
पमुभे हि सामनी क्रियेते ॥२॥ तमुष्टुहि यो अभिभूत्योजा ऽइति सूक्तमभिवद
भिभूत्यै रूपमषाळ्हमुग्रं सहमानमाभिरित्युग्रवत्सहमानवत्तत्क्षत्रस्य रू
पं तत्संचदशर्चं भवत्योजो वा इंद्रियं वीर्यं पंचदश ओजः क्षत्रं वीर्यं राजन्यस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥ देनमोजसाक्षत्रेणवीर्येणसमर्द्धयतितद्भारद्वाजंभवतिभारद्वाजंवैबृहदार्षे
येणसलोमैषहवावक्षत्रिययज्ञःसमृद्धोबृहत्पृष्ठस्तस्माद्यत्रक्वचक्षत्रियो
यजेतबृहदेवतत्रपृष्ठंस्यात्तत्समृद्धम्॥३॥ऐकाहिकाहोत्राएवैशांताःकृ ता३
त्रा प्ताःप्रतिष्ठिताहोत्रायदैकाहिकाःशांत्यैकॢप्त्यैप्रतिष्ठित्याअप्रच्युत्यैताःसर्वरू
पाभवंतिसर्वसमृद्धाःसर्वरूपतायैसर्वसमृद्ध्यैसर्वरूपाभिर्होत्राभिःसर्व
समृद्धाभिःसर्वान्कामानवाप्नवामेतितस्माद्यत्रक्वचैकाहाअसर्वस्तोमाअ
सर्वपृष्ठाऐकाहिकाएवतत्रहोत्राःस्युस्तत्समृद्धमुक्थ्यएवायंपंचदशस्या ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दित्याहरोजोवाइंद्रियंवीर्यंपंचदशःओजःक्षत्रंवीर्यंराजन्यःस्तदेनमोजसाक्षत्रे
णवीर्येणसमर्द्धयतितस्यत्रिंशत्स्तुतशस्त्राणिभवंतित्रिंशदक्षराविराड्विराळ
न्नाद्यंवैराज्यंवैनंतदन्नाद्येप्रतिष्ठापयतितस्मात्तदुक्थ्यंपंचदशस्यादित्योह
ज्योतिष्टोमएवाग्निष्टोमस्याङ्गंवैस्तोमानांत्रिवृत्क्षत्रंपंचदशोब्रह्मखलुवै
क्षत्रात्पूर्वंब्रह्मपुरस्तान्महउग्रंराष्ट्रमव्यथमसदितिविंशःसप्तदशःस्तोऽस्तोवर्ण
एकविंशोविंशेचैवास्मैतच्छोऽस्तोवर्णमनुवस्मैकुर्वंत्यथोतेजोवैस्तोमानां
त्रिवृद्वीर्यंपंचदशःप्रजातिःसप्तदशःप्रतिष्ठैकविंशस्तदेनंतेजसावीर्येणब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥

जात्याप्रतिष्ठयांततःसमर्द्धयतितस्माज्ज्योतिष्टोमस्यात्तस्यचतुर्विंशतिस्तुतश
स्त्राणिभवंतिचतुर्विंशत्यर्द्धमासोवैसंवत्सरःसंवत्सरेकृत्स्नमन्नाद्यंकृत्स्नऽए
वैनंतदन्नाद्येप्रतिष्ठापयतितस्माज्ज्योतिष्टोमएवाग्निष्टोमस्यादग्निष्टोमस्या
त्॥४॥इतिअष्टमपंचिकायांप्रथमोध्यायः॥अथातःपुनरभिषेकस्यैवसूय
तेहवाअस्यक्षत्रंयोदीक्षतेक्षत्रियःसन्त्सयदावभृथादुदेत्यान्नबंध्यपेष्ट्वो
दवस्यत्यथैनमुदवसानीयायांसंस्थितायांपुनरभिषिंचंतितस्यैतेपुरस्तादे
वसंभाराउपक्लृप्ताभवंत्यौदुंबर्यासंदीतस्यैप्रादेशमात्राःपादास्युररत्निमात्राणि

॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शीर्षण्यानूच्यातिमौंजंविवयनंव्याघ्रचर्मास्तरणमौदुंबरश्चमसउदुंब
रशाखातस्मिन्नेतस्मिंश्चमसेष्टातयानिनिषुतानिभवंतिदधिमधु
सर्पिरातपवर्ष्याआपःशष्पाणिचतोक्मानिचसूरादूर्वातद्यैषादक्षिणा
स्पयवर्तनिर्वेदेर्भवतितत्रैतांप्राचीमासंदींप्रतिष्ठापयतितस्याअंतर्वेदि
द्वौपादौभवतोबहिर्वेदिद्वावियंवैश्रीस्तस्याएतत्परिमितंरूपंयदंतर्वेद्य
थैषभूमापरिमितोयोबहिर्वेदितद्यदस्याअंतर्वेदिद्वौपादौभवतोबहिर्वे
दिद्वाउभयोःकामयोरूपाप्त्यैयश्चांतर्वेदियश्चबहिर्वेदि॥९॥१॥व्याघ्रचर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णास्तृणात्युत्तरलोम्नाप्राचीनग्रीवेणक्षत्रंवाएतदारण्यानांपशूनांय
यद्व्याघ्रःक्षत्रंराजन्यःक्षत्रेणैवतत्क्षत्रंसमर्धयतितांपश्चात्प्राङुपवि
श्याच्यजानुदक्षिणमभिमंत्रयतऽउभाभ्यांपाणिभ्यामालभ्याग्निष्ट्वा
गायत्र्यासयुक्छंदसारोहतुसवितोष्णिहासोमोनुष्टुभाबृहस्पतिर्बृ
हत्यामित्रावरुणौपंक्त्येंद्रस्त्रिष्टुभाविश्वेदेवाजगत्यातानहमनुराज्या
यसाम्राज्यायभौज्यायस्वाराज्यायवैराज्यायपारमेष्ठ्यायराज्यायमा
हाराज्यायाधिपत्यायस्वावश्यायातिष्ठायारोहामीत्येतामासंदीमारोहे

॥५॥

॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणेनाग्रे जानुनाथ सव्येन नत्तदितीं३ चतुरुत्तरैर्वै देवाश्छंदोभिः सयुक्
भूत्वैतां श्रियमारोहन्यस्यामेतऽएतर्हि प्रतिष्ठिता अग्निर्गायत्र्या सवितो
ष्णिहा सोमोनुष्टुभा बृहस्पतिर्बृहत्या मित्रावरुणौ पंक्त्येंद्रस्त्रिष्टुभा विश्वे
देवा जगत्या तेऽएते अभ्यनूच्येते अग्नेर्गायत्र्यभुवत्सयुग्वेति कल्पते ह वा
अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रियमश्नुते श्नुते ह प्रजानामैश्वर्यमा
धिपत्यं य एवमेता अनुदेवता एतामासंदीमारोहति क्षत्रियः सन्नथैन
मभिषेक्ष्यन्नपां शांतिं वाचयति शिवेन मा चक्षुषा पश्यतापः शिवया त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥

चोपस्पृशतत्वचंमे॥सर्वांअग्नींरप्सुषदोहवेवोमयिवर्चोबलमोजोनि
धत्तेतिनैतस्याभिषिषिचानस्याशांताआपोवीर्यंनिर्हणंनिति॥६॥२॥
अथैनमुदुंबरशाखामंतर्ध्यांयाभिषिंचतीमाआपःशिवतमाऽइमाः
सर्वस्यभेषजीः॥इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः॥याभिरिंद्र
मभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं॥ताभिरद्भिरभिषिंचा
मित्वामहंराज्ञांत्वमधिराजोभवेह॥महांतंत्वामहीनांसम्राजंचर्षणीनां
देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनद्देवस्यत्वासवितुःप्रसवेश्विनो ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि॥
बलायश्रियैयशसेंन्नाद्यायभूरितिपइच्छेदिममेवप्रत्यन्नमद्यादित्यथय
इच्छेद्विपुरुषंभूर्भुवइत्यथयइच्छेत्त्रिपुरुषंवाप्रतिसंवाभूर्भुवस्वरितित
धैकआहुःसर्वाप्तिर्वाएषायदेताव्याहृतयोतिसर्वेणहास्यपरस्मैकृतं
भवतीतितमेतेनाभिषिंचेद्देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो
हस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामिबलायश्रियै
यशसेन्नाद्यायेतितदुपुनःपरिचक्षतेयदसर्वेणवाचोभिषिक्तोभवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वरोहतुपुरायुषःप्रेतोरितिहस्माहसत्यकामोजाबालोयमेताभिर्व्याहृतिभि
र्नाभिषिंचतीतीश्वरोहसर्वमायुरेतोःसर्वमाप्नोद्विजयेनेत्युहस्माहोद्दाल
कआरुणिर्यमेताभिर्व्याहृतिभिरभिषिंचतीतितमेतेनैवाभिषिंचेद्वस्योचा
सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्ये
न्द्रियेणाभिषिंचामि।बलायश्रेयसेन्नाद्यायकर्मणेवीर्यायेत्येतानि
हवैक्षत्रियादीजानाद्युक्तानिभवंतिबलक्षत्रेऊर्गन्नाद्यमपामोषधीनांर
सोब्रह्मवर्चसमिरापुष्टिःप्रजातिःक्षत्ररूपंतदथोअन्नस्यरसऽओषधीनांक्षत्रं ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिष्ठा तद्यदेवामूपुरस्तादाहुतीर्जुहोति तदस्मिन्ब्रह्मक्षत्रे दधाति ॥३॥ अथय
दौदुंबर्यासंदीभवत्यौदुंबरश्चमस उदुंबरशाखोर्ग्वा अन्नाद्यमुदुंबर ऊर्जमेवा
स्मिंस्तदन्नाद्यं दधात्यथ यद्दधि मधु घृतं भवत्यपां स ओषधीनां रसोपामेवा
स्मिंस्तदोषधीनां रसं दधात्यथ यदातपवर्ष्या आपो भवंति तेजश्च ह वै ब्रह्मवर्च
सं चातपवर्ष्या आपस्तेज एवास्मिंस्तद्ब्रह्मवर्चसं दधात्यथ यच्छष्पाणि च तोक्मा च
नि च भवंती रायै तत्पुष्ट्यै रूपमथो प्रजात्या इरामेवास्मिंस्तत्पुष्टिं दधात्यथो प्रजा
तिमथ यत्सुरा भवति क्षत्ररूपं तदथो अन्नस्य रसः क्षत्ररूपमेवास्मिंस्तद्दधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

त्यथो अन्नस्य रसमथ यद्दूर्वा भवति क्षत्रं वा एतदोषधीनां यद्दूर्वा क्षत्रं राजन्यो नि तत
इव हीह क्षत्रियो राष्ट्रे वसन्भवति प्रतिष्ठित इव नि ततेव दूर्वा विरोधैर्भूम्यां प्रतिष्ठितेव तद्य
द्दूर्वा भवत्योषधीनामेवास्मिंस्तत्क्षत्रं दधात्यथो प्रतिष्ठामेतानि ह वै यान्यस्मादीजा
नीष्व्युत्क्रांतानि भवंति तान्येवास्मिंस्तद्दधाति तैरेवैनं तत्सत्समर्द्धयत्यथास्मै सुरा
कं संहस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे सु
तइत्याधाय शांतिं वाचयति नानाँवां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योम
नि ॥ सुरा त्वमसि शुष्मिणी सोम एष राजा मैनं हिंसिष्टं स्वां योनिमाविशंताविति सो

हि२

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मपीथस्यचैषासुरापीथस्यचव्याहृतिःपीत्वायंरातिंमन्येततस्मादेनांप्रयच्छेन्न
धिमित्रस्यरूपंमित्रएवैनांतदंततःप्रतिष्ठापयतितथाहिमित्रेप्रतितिष्ठतिप्रति
ष्ठितियएवंवेद ॥८॥ अथोदुंबरशाखामभिप्रत्यवरोहत्यूर्वाजेनाग्रमुदुंबरऊ
र्जमेवदैतेनाग्रमभिप्रत्यवरोहत्युपर्येवासीनोभूमौपादौप्रतिष्ठाप्यप्रत्यवरोह
माहप्रतितिष्ठाभिघावाष्ठिव्योःप्रतितिष्ठाभिघानापानयोःप्रतितिष्ठाम्य
होरात्रयोःप्रतितिष्ठाम्येनपानयोःप्रतिब्रह्मप्रतिक्षत्रेप्रत्येवैषुपुलोकेषु
तिष्ठामीयंततःसर्वेणात्मनाप्रतितिष्ठतिसर्वस्मिन्रूपेणास्मिन्प्रतिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥

ष्ठत्युत्तरोत्तरिणीहश्रियश्नुतेश्नुतेहप्रजानामैश्वर्यमाधिपत्यंयएवमेतेनपु
नरभिषेकेणाभिषिक्तःक्षत्रियःप्रत्यवरोहत्येतेनप्रत्यवरोहेणप्रत्यवरु
ह्योपस्थंकृत्वाप्राङासीनोनमोब्रह्मणेनमोब्रह्मणेनमोब्रह्मणइतित्रिष्कृ
त्वोब्रह्मणेनमस्कृत्यवरंददामिजित्याअभिजित्यैविजित्यैसंजित्याइ
तिवाचंविसृजतेसयंनमोब्रह्मणेनमोब्रह्मणेनमोब्रह्मणइतित्रिष्कृत्वो
ब्रह्मणेनमस्करोतिब्रह्मणएवतत्क्षत्रंवशमेतितद्यत्रवैब्रह्मणःक्षत्रं
वशमेतितद्राष्ट्रंसमृद्धंतद्वीरवदाहास्मिन्वीरोजायतेथयद्वरंददामि

सूर्य

॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जित्याअभिजित्यैविजित्यैसंजित्याइतिवाजंविसृजतएतद्वैवा[illegible]चोजितं
यद्ददामीत्याहयदेववाचोजितां३॥तन्मइदमनुकर्मसंतिष्ठाताइतिविसृ
ज्यवाचमुपोत्थायाहवनीयेसमिधमभ्यादधातिसमिदसिसम्वेंक्ष्वें
द्रियेणवीर्येणस्वाहेतींद्रियेणैवतद्वीर्येणात्मानमंततःसमर्द्धयत्या
धायसमिधंत्रीणिपदानिप्राङुदंङभ्युत्क्रामतिक्लृप्तिरसिदिशांमयि
देवेभ्यःकल्पताकल्पतांमेयोगक्षेमोभयंमेस्त्वित्यपराजितांदिशा
मुपतिष्ठतेजितस्यैवापुनःपराजयायतत्तदितीम्॥५॥९॥देवासु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥

रावार्येषुन्नोकेषुसंयेतिरेतएतस्यांप्राच्यांदिशियेतिरेतांस्ततोसुराअ
जयंस्तेदक्षिणस्यांदिशियेतिरेस्तेतांतोसुराअजयंस्तेप्रतीच्यांदिशि
येतिरेतांस्ततोसुराअजयंस्तउदीच्यांदिशियेतिरेतांस्ततोअसुरा
अजयंस्तएतस्मिन्नवांतरदेशेयेतिरेयएषप्राङुदङ्ङेहततोजिग्यु
स्तंयदिक्षत्रियउपधावेत्सेनयोःसमायत्योस्तथामेकुरुयथाह
मिमांसेनांजयानीतिसयदितथेतिब्रूयाद्वनस्पतेवीड्वंगोहिभू
याइत्यस्यरथोपस्थमभिमृश्याथैनंब्रूयादातिष्ठस्वैतांतेदिश

सूर्य

॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मभिमुखः सन्नक्षोरथोभिप्रवर्त्तांसउदङ्सप्रत्यङ्वसदक्षिणा
सप्राङसोभ्यमित्रमित्यभीवर्त्तेनहविषैवैनमावर्त्तयेदथैन
मन्वीक्षेनाप्तिरथेनशासेनसोपर्णेनेतिहैतांसेनोयज्ञुवाए जयति
नमुपधावेत्संग्रामंसंयत्तिष्यमाणस्तथामेकुरुयथाहमिमं
संग्रामंसंजयानीयेतस्यामेवैनंदिशियात्तयैजयतिहतंसंग्रा
मंयज्ञुवाएनमुपधावेद्राष्ट्रादपरुध्यमानस्तथामेकुरुयथाह
मिदंराष्ट्रंपुनरवगच्छानीयेतामेवैनंदिशमुपनिष्क्रमयेत्तथा

॥११॥

हराष्ट्रं पुनरवगच्छत्युपस्थाया मित्राणां व्यपनुत्तिं ब्रुवन्गृहानभ्येत्य
पप्राच इंद्र विश्वां अमित्रानित्ति सर्वतो हास्मा अनमित्रमभयं भवत्यु
त्तरोत्तरिणीं ह श्रियमश्नुते श्नुते ह प्रजानामैश्वर्यमाधिपत्यं य एवमा
ताममित्राणां व्यपनुत्तिं ब्रुवन्गृहानभ्येत्येत्य गृहान्पश्चाद्गृह्यस्या
ग्नेरुपविष्टायान्वारब्धाय ऋत्विगंततः कंसेन चतुर्गृहीतास्ति
स्र आज्याहुतीरैंद्रीः प्रदं जुहोत्यनार्त्या आरिष्ट्या अज्यान्या अभ
याय ॥१०॥६॥ पर्यूषु प्रधन्व वाजसातये परि वृत्रा भूर्ब्रह्म प्राणम

प२

सूर्य
११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृतंप्रपद्यतेयमसौशर्मवर्माभयंस्वस्तये॥सहप्रजयासहप
शुभिर्णिसृक्षणिर्द्विषस्तऋध्याऋणयानइयसेस्वाहा॥
अनुहित्वासुतंसोममदामसिमहेसमभुवोब्रह्मप्राणाम
मृतंप्रपद्यतेयमसौशर्मवर्माभयंस्वस्तये॥सहप्रजया
सहपशुभिर्यराज्येवाजांअभिपवमानप्रगाहसेस्वाहा॥
अजीजनोहिपवमानसूर्यंविधारेशस्वर्ब्रह्मममृतंप्रप
द्यतेयमसौशर्मवर्माभयंस्वस्तये॥सहप्रजयासहपशुभिः

प्राण२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्मनापयोगोजीरयारंहमाणःपुरंध्यास्वाहेत्यनार्त्तोहवाअरिष्टोजी
तःसर्वतोगुप्तस्त्रय्यैविद्यायैरूपेणसर्वादिशोनुसंचरत्यैंद्रेलो
केप्रतिष्ठितोयस्माएताऋत्विगंततःकंसेनचतुर्गृहीतास्तिस्रऽ
आज्याहुतीरैंद्रीःप्रपदंजुहोत्यथांततःप्रजातिमाशास्तेगवा
मश्वानांपुरुषाणामिहगावःप्रजायध्वमिहाश्वाइहपूरु
षाः॥इहोसहस्रदक्षिणोवीरस्त्रातानिषीदत्विति बहुरुहवैप्रं
जयापशुभिर्भवतियएवमेतामंततःप्रजातिमाशास्तेगवा

सूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मश्वानां पुरुषाणामेष ह वाव क्षत्रियो विकृष्टो यमेवं विदो या
जयंत्यथ हतं व्येव कर्षंते यथा ह वा इदन्निषादा वा सेलगा वा
पापकृतो वा वित्तवंतं पुरुषमरण्ये गृहीत्वा कर्त्तमन्वस्य वित्तमा
दाय द्रवंत्येवमेव तऋत्विजो यजमानं कर्त्तमन्वस्य वित्तमादाय द्र
वंति यमनेवं विदो याजयंत्येतद्ध स्म वै तद्विद्वानाह जनमेजयः
पारिक्षित एवं विदं हि वै मामेवं विदो याजयंति तस्मादहं जयां
म्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया नमा दिव्या नमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुष्य इषव ऋछंत्येष्यामि सर्वमायुः सर्वभूमिर्भविष्यामीति न ह वा ए
नं दिव्यानमानुष्य इषव ऋछंत्येति सर्वमायुः सर्वभूमिर्भवति यमे
वं विदो याजयंति याजयंति ॥७॥११॥ इत्यष्टमपंचिकायां द्वितीयो
ध्यायः ॥ ॐम् ॥ अथात ऐंद्रो महाभिषेकस्तं देवा अब्रुवन्सप्रजा
पतिका अयं वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयि
ष्णुतम इममेवाभिषिंचामहा इति तथेति तद्वै तदिंद्रमेव तस्मा
एतामासंदीम्समभरन्नृचन्नाम तस्यै बृहच्च रथंतरञ्च पूर्वौ पा

सूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दावकुर्वन्वैरूपञ्चवैराजंचापरौशाक्कररैवतेशीर्षण्येनौधसंच
कालेयंचानूच्येऋचःप्राचीनातानान्त्सामानितिरश्चीनवायान्यजूं
ष्यतीकाशान्यशआस्तरणंश्रियमुपबर्हणंतस्यैसवितांबृहस्पति
श्चपूर्वौपादावधारयतांवायुश्चपूषाचापरौमित्रावरुणौशी
र्षण्येअश्विनावनूच्येसएतामासंदीमारोहद्वसवस्त्वागायत्रे
णछंदसात्रिवृतास्तोमेनरथंतरेणसाम्नारोहंतुतानन्वारो
हामिसाम्राज्यायरुद्रास्त्वात्रैष्टुभेनछंदसापंचदशेनस्तोमे

च३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नबृहतासाम्नारोहंतुतानन्वारोहामिभौज्यायादित्यास्त्वाजा
गतेनछंदसासप्तदशेनस्तोमेनवैरूपेणसाम्नारोहंतुतान
न्वारोहामिस्वाराज्यायविश्वेत्वादेवाआनुष्टुभेनछंदसैक
विंशेनस्तोमेनवैराजेनसाम्नारोहंतुतानन्वारोहामिवैराज्या
यसाध्याश्चत्वाप्त्याश्चदेवाःपाङ्क्तेनछंदसात्रिणवेनस्तोमेनशा
क्वरेणसाम्नारोहंतुतानन्वारोहामिराज्यायमरुतश्चत्वाङिर
सश्चदेवाअतिछंदसाछंदसात्रयस्त्रिंशेनस्तोमेनरैवतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साम्राज्यारोहंतुतानन्वारोहाभिपारमेष्ठ्यायमाहाराज्याधिपत्या
यस्वावत्र्याधातिष्ठायारोहामीयेतामासंदीमारोहत्तमेतस्या
मासंध्यामासीनंविश्वेदेवाऽअब्रुवन्नवाऽअनभ्युत्कृष्टंक्षत्रंवीर्यं
कर्त्तुमर्हत्यभ्येनमुत्क्रोशामेतितथेतितंविश्वेदेवाऽअभ्युत्क्रो
शंनिमंदेवाऽअभ्युत्क्रोशतसाम्राज्यंभोज्यंभोजपितरंस्व
राज्यंविराज्यंराज्यंराजानंराजपितरंपरमेष्ठिनंपा
रमेष्ठ्यंक्षत्रमजनिक्षत्रियोजनिविश्वस्यभूतस्याधिपति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजनिविशामत्ताजनिपुरांभेत्तान्यराणांहंताजनिब्रह्मणोगो
प्ताजनिधर्मस्यगोप्ताजनीतितमभ्युत्कृष्टंप्रजापतिरभिषे
क्ष्यंनेतयर्चाभ्यमंत्रयते॥१२॥१॥निषसादधृतव्रतोवरुणः
पस्त्यास्वा॥साम्राज्यायभौज्यायस्वाराज्यायवैराज्यायपा
रमेष्ठ्यायराज्याय माहाराज्यायाधिपत्यायस्वावश्या
यातिष्ठायसुक्रतुरितितमेतस्यामासंद्यामासीनंप्रजाप
तिःपुरस्तात्तिष्ठन्प्रत्यङ्मुखऔदुंबर्यार्द्रयाशाखयासप

सूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाशायाजातरूपमयेनचपवित्रेणांत र्धायाभ्यषिंचदिमा
आपःशिवतमाइत्येतेनतत्वेनदेवस्यत्वेतिचयजुषाभूर्भु
वस्वरित्येताभिश्चव्याहृतिभिः॥१२॥अथैनंप्राच्यांदि
शिवसवोदेवाःषडृत्विजश्चैवपंचविंशैरहोभिरभ्यषिंचन्ने
च तेनैतत्वेनेतेनचयजुषैताभिश्चव्याहृतिभिःसाम्राज्याय
तस्मादेतस्याम्राच्यांदिशियेकेचप्राच्यानांराजानःसाम्रा
ज्यायैवतेभिषिच्यंतेसंभ्राड्येनानभिषिक्तानाचक्षते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतामेवदेवानांविहितिमन्वथैनद्दक्षिणस्यांदिशिरुद्रादे
वाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचन्नेतेनचत्वचेनैते
नचयजुषैताभिश्चव्याहृतिभिर्भोज्यायैतस्माद्दतस्यांद
क्षिणस्यांदिशियेकेचसत्वतांराजानोभोज्यायैवतेभिषि
च्यंतेभोजयेनानभिषिक्तानाचक्षतएतामेवदेवानां
विहितिमन्वथैनंप्रतीच्यांदिशिविश्वेदेवाःषड्भिश्चै
वपंचविंशैरहोभिरभ्यषिंचेनेतेनचत्वचेनैतेनयजु

सूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षैताभिश्चव्याहृतिभिःस्वाराज्यायतस्मादेतस्याम्प्रतीच्यां
दिशियेकेचनीच्यानांराजानोयेपाच्यानांस्वाराज्यायैव
तेभिषिच्यंतेस्वराडित्येनानभिषिक्तानाचक्षतएतामे
वदेवानांविहितिमचथैनमुदीच्यांदिशिविश्वेदेवाःषड्भि
श्चैवपंचविंशैरहोभिरभ्यषिंचंनेतेनतृचेनैतेनचयजु
षैताभिश्चव्याहृतिभिर्वैराज्यायतस्मादेतस्यामुदीच्यां
दिशियेकेचपरेणहिमवंतंजनपदाउत्तरकुरवउत्तरम

च३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७॥

द्राइतिवैराज्यायैवतेभिषिच्यंतेविराळित्येनानभिषिक्तानाचक्षतएतामेवदेवानांविहितिमन्वथैनमस्यांध्रुवायांमध्यमायांप्रतिष्ठायांदिशिसाध्याश्चास्याश्चदेवाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचन्नेतेनैतत्त्वेनैतेनचयजुर्वेदाभिश्चव्याहृतिभीराज्यायतस्मादस्यांध्रुवायांमध्यमायांप्रतिष्ठायांदिशियेकेचकुरुपंचालानांराजानःसर्वेक्षीनरापांराज्यायैवतेभिषिच्यंतेराजेत्येनानभिषिक्तानाचक्षतए

सूर्य ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामेवदेवानांविहितिमन्वथैनमूर्द्ध्वायांदिशिमरुतश्चाङ्गि
रसश्चदेवाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचन्नेतेनतृचे च २
नैतेनचयजुषैताभिश्चव्याहृतिभिःपारमेष्ठ्यायमाहाराज्या
याधिपत्यायस्वावश्यायातिष्ठायेतिसपरमेष्ठीप्राजापत्योभ
वत्सएतेनमहाभिषेकेणाभिषिक्तइंद्रःसर्वाजितीरजयत्सर्वांल्लोका
नविंदत्स र्वेषांदेवानांश्रैष्ठ्यमतिष्ठांपरमतामगछत्साम्राज्यंभौज्यं
स्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यंजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खास्मिंल्लोकेस्वयंभूःस्वराडमतोमुष्मिन्स्वर्गेलोकेसर्वान्काम
नाप्नोमृतःसमभवत्समभवत्॥१०॥३॥इत्यष्टमपंचिका
यांतृतीयोध्यायः॥ॐभू॥सयइच्छेद्देवंविक्षत्रियमयंसर्वाजि
तीर्जयेतायंसर्वंलोकान्विंदेतायंसर्वेषांराज्ञांश्रेष्ठ्यमतिष्ठां
परमतांगच्छेत्साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंरा
ज्यंमाहाराज्यमाधिपत्यमयंसमंतपर्यायीस्यात्सार्वभौम
सार्वायुषआंतादापरार्द्धात्पृथिव्यैसमुद्रपर्यंतायाएकराडिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेतेनैंद्रेणमहाभिषेकेणक्षत्रियंग्राप्यित्वाभिषिंचेद्यांचराज्ञीमजायेथा
यांचघ्रेतासितदुभयमंतरेणेष्टापूर्त्तंतेलोकंसुकृतमायुःप्रजांवृंजीयंयदि
मेद्विषेरितिसयऽइच्छेदेवंविक्षत्रियोहंसर्वाजितीर्जयेयमहंसर्वंलोक
ञ्चिंदेयमहंसर्वेषांराज्ञांश्रेष्ठ्यमतिष्ठांपरमतांगच्छेयंसाम्राज्यंभौज्य
स्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यमहंसमंतप
र्यायीस्यांसार्वभौमःसार्वायुषऽआंतादापरार्धात्पृथिव्यैसमुद्र
पर्यंतायाऽएकराळितिसनविचिकित्सेसब्रूयात्सहश्रद्धायांच
राज्ञीमजायेहंयांचघ्रेतास्मितदुभयमंतरेणेष्टापूर्त्तंमेलोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९॥

सुकृतमायुःप्रजांवृंजीथायदितेद्रुह्येयमिति॥१५॥१॥अथततोब्रूया
च्चतुष्टयानिवानस्पत्यानिसंभरतनय्यग्रोधांन्यौदुंबराण्याश्वत्था
निप्लाक्षाणीतिक्षत्रंवाएतद्वनस्पतीनांयन्यग्रोधोयंनय्यग्रो
धानिसंभरंतिक्षत्रमेवास्मिंस्तद्दधातिभौज्यंवाएतद्वनस्प
तीनांयदुदुंबरोयदौदुंबराणिसंभरंतिभौज्यमेवास्मिंस्त
द्दधातिसाम्राज्यंवाएतद्वनस्पतीनांयदश्वत्थोयदाश्वत्था
निसंभरंतिसाम्राज्यमेवास्मिंस्तद्दधातिस्वाराज्यंचहवाएतद्वी

सूर्य
॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णंमहाव्रीहि२

वैराज्यंचवनस्पतीनांयत्क्षोयत्क्षाक्षाणिसंभरंतिस्वाराज्यवैरा
ज्येऽएवास्मिंस्तद्दधातियथततोब्रूयाच्चतुष्टयान्योषधानिसंभर
ततोक्मकृतानिव्रीहीणांप्रियंगूनांयवानामितिक्षत्रंवाएतदो
षधीनांयद्व्रीहयोयद्व्रीहीणांतोक्मंसंभरंतिक्षत्रमेवास्मिंस्त
द्दधातिसाम्राज्यंवाऽएतदोषधीनांयन्महाव्रीहयोयन्महाव्रीही
णांतोक्मंसंभरंतिसाम्राज्यमेवास्मिंस्तद्दधातिभोज्यंवाऽए
तदोषधीनांयप्रियंगवोयप्रियंगूनांतोक्मंसंभरंतिभोज्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवास्मिंस्तद्धातिसेनान्यंवाएतदोषधीनांयद्यद्वायद्यद्वानांतो
क्मसंभरंतिसेनांन्यमेवास्मिंस्तद्धाति ॥१६॥२॥अथास्माऔ
दुंबरीमासंदींसंस्तरंतितस्याऊर्क्ब्राह्मणमौदुंबरश्चमसोवापा
त्रीवोदुंबरशाखातानेतान्त्संभारान्त्संभृत्यौदुंबर्यांपात्र्यांवाचमसे
वासमावपेयुस्तेषुसमोप्तेषुदधिमधुसर्पिरातपवर्षाआपो
भ्यानीयप्रतिष्ठाप्यैतामासंदीमभिमंत्रयेतबृहच्चैरथंतरंच तेर
पूर्वैपादौभवतांवैरूपंचवैराजंचापरौशाक्करैवतेवृष्णिये सूर्य
॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नौधसंचकालेयंचानूच्येऋचःप्राचीनातानाःसामानितिरश्चीनवा
यायजूंष्यतीकाशायशआस्तरणंश्रीरुपबर्हणंस्रविताचतेबृहस्पतिश्चपू
र्वौपादौधारयतांवायुश्चपूषाचापरौमित्रावरुणौशीर्षण्येअश्विनावनू
च्येइत्यथैनमेतामासंदीमारोहयेद्वसवस्त्वागायत्रेणछंदसात्रिवृतास्तोमे
नरथंतरेणसाम्नारोहंतुतानन्वारोहसांम्राज्यायरुद्रास्त्वात्रैष्टुभेनछं
दसापंचदशेनस्तोमेनबृहतासाम्नारोहंतुतानन्वारोहभौज्यायादि
त्यास्त्वाजागतेनछंदसासप्तदशेनस्तोमेनवैरूपेणसाम्नारोहंतुतानन्वारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥

हस्तिराज्याय विश्वे त्वा देवा आनुष्टुभेन छंदसैकविंशेन स्तोमेन वै
राजेन साम्नारोहंतु तानन्वारोहामि वैराज्याय मरुतश्च त्वां गिरसश्च
देवा अतिछंदसा छंदसा त्रयस्त्रिंशेन स्तोमेन शाक्वरेण साम्नारो
हंतु तानन्वारोह राज्याय माहाराज्याया धिपत्याय स्वावश्याया
तिष्ठाया रोहेत्येतामासंदीमारोहयेत्तमेतस्यामासंद्यामासीनं
राजकर्त्तारो ब्रूयुर्नवा अनभ्युत्कृष्टः क्षत्रियो वीर्यं कर्त्तुमर्हत्य
भ्येनमुत्क्रोशामेति तथेति तं राजकर्त्तारोभ्युत्क्रोशंतीमंज

॥ रैवतेन साम्नारोहंतु तानन्वारोह पारमेष्ठ्याय साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छंदसा त्रिपा

त्वां २

सूर्य

॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाअभ्युत्क्रोशात संम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं जे १
विराज्यं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं क्षत्रमजनि क्षत्रियो
जनि विश्वस्य भूतस्याधिपतिरजनि विशामत्ताजन्यमित्राणां हंताजनि
ब्राह्मणानां गोप्ताजनि धर्मस्य गोप्ताजनीति तमभ्युत्कृष्टमेवं विदमभि
षेक्ष्यन्नेतयार्चाभिमंत्रयेत ॥ ३ ॥ निषसाद धृतव्रतो वरुणः पस्त्यास्वा ॥ सा
[illegible]याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्याय स्वावश्याया तिष्ठाय सुक्रतुरिति तमेतस्यामासंद्या
तीनमेवं वित्पुरस्तात्तिष्ठन्प्रत्यङ्मुख औदुंबर्या ईयाशाखया
सपलाशया जानरूपमयेन च पवित्रेणांतर्धाया भिषिंच सीमा
आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवः स्व
रित्येताभिश्च व्याहृतिभिः ॥१८॥४॥ प्राच्यां त्वादिशि वसवो देवाः
षड्भिश्चैव पंचविंशैरहोभिरभिषिंचंत्वेतेन च तृचेनैतेन च यजु
षैताभिश्च व्याहृतिभिः साम्राज्याय दक्षिणस्यां त्वादिशि रुद्रा

सूर्य
॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवाःषड्भिश्चैवपंचविंशैरहोभिरभिषिंचेत्तेनचत्वचेनैतेनच
यजुषैताभिश्चव्याहृतिभिर्भौज्यायपत्नीभ्यांवादिश्यादित्यादेवाः
षड्भिश्चैवपंचविंशैरहोभिरभिषिंचेत्तेनचत्वचेनैतेनचयजु
षैताभिश्चव्याहृतिभिःस्वाराज्यायोदीच्यांवादिशिविश्वेदेवाःष
ड्भिश्चैवपंचविंशैरहोभिरभिषिंचेत्तेनचत्वचेनैतेनचयजुषै
ताभिश्चव्याहृतिभिर्वैराज्यायोर्ध्वायांवादिशिमरुतश्चांगिरस
श्चदेवाःषड्भिश्चैवपंचविंशैरहोभिरभिषिंचेत्तेनचत्वचेनैतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चयजुषैताभिश्चव्याहृतिभिः पारमेष्ठ्यायास्यां ध्रुवायांमध्यमा
यांप्रतिष्ठायांदिशिसाध्याश्चास्याश्चदेवाःषड्भिश्चैवपंचविंशैर
होभिरभिषिंचंतेनचतत्चैनैतेनचयजुषैताभिश्चव्याहृतिभी
राज्यायमाहाराज्यायाधिपत्यायस्वावश्यायातिष्ठायेतिसपर
मेष्ठीप्राजापत्योभवतिसएतेनैंद्रेणमहाभिषेकेणाभिषिक्तः
क्षत्रियःसर्वाजितीर्जयतिसर्वांल्लोकान्विंदतिसर्वेषांराज्ञांश्रेः
ष्ठ्यमतिष्ठांपरमतांगच्छतिसाम्राज्यंभोज्यंस्वाराज्यंवैराज्यंपा

सूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमेष्वंराज्यंमाहाराज्यमाधिपत्यंजित्वास्मिंल्लोकेस्वयंभूस्वराळभू
तोमुष्मिंस्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसंभवतियमेतेनैंद्रेण
महाभिषेकेणक्षत्रियंयाजयित्वाभिषिंचति॥५॥१९॥इंद्रियंवाएत
दस्मिंल्लोकेयद्दधियद्दध्नाभिषिंचतींद्रियमेवास्मिंस्तद्दधातिरसो
वाएषऊर्षधिवनस्पतिषुयन्मधुयन्मधाभिषिंचतिरसमेवा
स्मिंस्तद्दधातितेजोवाएतसवस्रांयद्घृतंयद्घृतेनाभिषिंचतिते
जऽएवास्मिंस्तद्दधातियमृतंवाएतदस्मिंल्लोकेयदापोयद्द्विरभिषिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०८

॥२७॥

चत्यमृतत्वमेवास्मिंस्तद्दधाति सोभिषिक्तोभिषेक्त्रे ब्राह्मणाय हि
रण्यं दद्यात्सहस्रं दद्यात्क्षेत्रं चतुष्पाद्दद्यादथाप्याहुरसंख्यातमेवा
परिमितं दद्यादपरिमितो वै क्षत्रियोपरिमितस्यावरुध्या इत्यथा
स्मै सुराकं संहस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया॥
इन्द्राय पातवे सुत इति तां पिबेद्यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपि
बच्छचीभिः॥ इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि॥
अभि त्वा वृषभा सुते सुतं सृजामि पीतये॥ तृंपा व्यश्नुहीमदमिति

सूर्य

॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योहवावसोमपीथःसुरायांप्रविष्टःसहैवैतेनैंद्रेणमहाभिषेकेणाभि
षिक्तैक्षत्रियस्यभक्षितोभवतिनसुरातांपीत्वाभिमंत्रयेतापामसो
मंत्वांनोभवेतितद्यथेवादःप्रियःपुत्रःपितरंप्रियावाजायापतिंसुखं
त्रिवमुपस्टरायाविस्रसएवंहैवैतेनैंद्रेणमहाभिषेकेणाभिषिक्त
स्यक्षत्रियस्यसुरावासोमोवान्यद्वानाघंसुखंत्रिवमुपस्टरायां
विस्रसः॥२०॥६॥एतेनहवाऐंद्रेणमहाभिषेकेणतुरःकावषे
योजनमेजयंपारिक्षितमभिषिषेचतेस्माद्वजनमेजयःपारिक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तःसमंतंसर्वतःपृथिवींजयन्पर्यायाश्वेनचमेध्येनेजेनदेवाभियज्ञ
गाथागीयते॥आसंदीवतिधान्यादंरुक्मिणंहरितस्रजं॥अश्वंबब
धसामंगंदेवेभ्योजनमेजयइत्येतेनहवाएंद्रेणमहाभिषेकेण
च्यवनोभार्गवःक्रुर्यातंमानवमभिषिषेचतस्मादुक्रुर्यातोमा
नवःसमंतंसर्वतःपृथिवींजयन्पर्यायाश्वेनचमेध्येनेजेदेवानां
हाविसत्रेगृहपतिरासेतेनहवाएंद्रेणमहाभिषेकेणसोमक
षमावाजरत्नायनःशतानीकंसात्राजितमभिषिषेचतस्मादुक्रा

॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानीकः साम्राजितः समंतं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येने
ज एतेन ह वा ऐंद्रेण महाभिषेकेण पर्वतं दावांबाष्ठ्यमभिषिषिचतुः
स्तस्माद्वांबाष्ठ्यः समंतं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येने
ज एतेन ह वा ऐंद्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्ठिमौग्र
सैन्यमभिषिषिचतुस्तस्माद्युयुधांश्रौष्ठिरौग्रसैन्यः समंतं सर्वतः पृ
थिवीं जयन्परीयायाश्वेन च मेध्येने ज एतेन ह वा ऐंद्रेण महाभिषे
केण कश्यपो विश्वकर्माणं भौवनमभिषिषेच तस्मादु विश्वकर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०८
॥२६॥

भौवनंःसमंतंसर्वतःपृथिवींजयंन्पशियायाश्वेनचमेध्येनेजेभूमिर्हज
गावित्युदाहरंतिनमामर्त्यःकश्चनदातुमर्हतिविश्वकर्मन्भौवनमोदिं
दासिथानिमंक्ष्येहंसलिलस्यमध्येमोघस्तएकश्यपायाससंग
रइत्येतेनहवाऐंद्रेणमहाभिषेकेणवसिष्ठःसुदासंपैजवनमभि
षिषेचतस्मादुसुदाःपैजवनःसमंतंसर्वतःपृथिवींजयन्पशिया
याश्वेध्येनेजएतेनहवाऐंद्रेणमहाभिषेकेणसंवर्त्तआंगिर
सोमरुत्तमाविक्षितमभिषिषेचतस्मादुमरुत्तआविक्षितः

नचमे२

सूर्य
॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समंतंसर्वतःपृथिवींजयन्परीयायाश्वेनचमेध्येनेजेतदप्येषश्लोको
अभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे॥आविक्षितस्यका
मप्रेर्विश्वेदेवाःसभासदऽइति॥२१॥७॥एतेनहवाऐंद्रेणमहा
भिषेकेणोदमयआत्रेयोंगमभिषिषेचतस्माद्वंगःसमंतंसर्वतः
पृथिवींजयन्परीयायाश्वेनचमेध्येनेजेसहोवाचालोपांगोदशना
गसहस्राणिदशदासीसहस्राणिददामितेब्राह्मणोपमास्मिन्य
ज्ञेह्वयस्वेतितदप्येतेश्लोकाऽअभिगीताः॥याभिर्गोभिरुदमयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥पं०८॥
॥२७॥

प्रय्यमेधा अयाजयन् ॥ द्वे द्वे सहस्रे बद्धानामात्रेयो मध्यतो ददात् ॥
अष्टाशीतिः सहस्राणि श्वेतान्वै रोचनो हयान् ॥ प्रष्टीं निश्चृत्य
प्रायच्छद्यजमाने पुरोहिते ॥ देशाद्देशात्समोह्लानां सर्वासामा
ढ्यदुहितॄणां ॥ दशाददात्सहस्राण्यात्रेयो निष्ककंठ्यः ॥ दशना
गसहस्राणि दत्वात्रेयो वचत्नुके ॥ श्रांतः पारिकुटान्प्रैप्सद्दानेनांग
स्य ब्राह्मणः ॥ शतं तुभ्यं शतं तुभ्यमिति स्मैकप्रताम्यति ॥ सह
स्रं तुभ्यमित्युक्त्वा प्राणान्त्स्म प्रतिपद्यत इति ॥ २२ ॥ ८ ॥ एतेन

सूर्य
॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हवाऐंद्रेणमहाभिषेकेणदीर्घतमामामतेयोभरतंदौष्यंतिमभि
षिषेचतस्मादुभरतोदौःषंतिःसमंतंसर्वतःपृथिवींजयन्परीया
याश्वैरुचमेध्यैरीजेतदप्येतेश्लोकाऽअभिगीताः॥हिरण्येन
परीवृतान्कृष्णाछुक्लदतोमृगान्॥मष्णारेभरतोददाछतंबद्वा
निसप्तच॥भरतस्यैषदौःषंतेरग्निःसाचीगुणेचितः॥यस्मिं
त्सहस्रंब्राह्मणाबद्वशोगाविभेजिरे॥अष्टासप्ततिंभरतोदौः
षंतिर्यमुनामनु॥गंगायांवृत्रघ्नेबध्नात्पंचपंचाशतंहयान्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰८

॥२८॥

त्रयस्त्रिंशच्छतं राजाश्वान्बद्धायमेध्यान्॥ दौःषंतिरत्यगाद्राज्ञोमा
यांमायवत्तरः॥ महाकर्मभरतस्यनपूर्वेनापरेजनाः॥ दिवमार्त्यऽइ
वहस्ताभ्यांनोदापुःष्पंचंमानवइत्येतंहवाऐंद्रेणमहाभिषेकंबृह
दुक्थऋषिर्दुर्मुखायपांचालायप्रोवाचतस्मादुदुर्मुखःपांचालोरा
जासन्विद्ययासमंतंसर्वतःपृथिवींजयन्परिप्यायैतंहवाऐंद्रंम
हाभिषेकंवासिष्ठःसात्यहव्योत्यरातयेजानंतपयेप्रोवाचतस्मा
द्वत्यरातिर्जानंतपिरराजासन्विद्ययासमंतंसर्वतःपृथिवींज

सूर्य

॥२८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्परीयायसहोवाचवासिष्ठःसात्यहव्योजैषीर्वैसमंतंसर्वतःपृ
थिवींमहन्मागमयेतिसहोवाचात्यरातिजनिंतपिर्यदाब्राह्मणो
त्तरकुरुंजयेयमथत्वमुहैवपृथिव्यैराजास्याःसेनापतिरेवते
हंस्यामितिसहोवाचवासिष्ठःसात्यहव्योदेवक्षेत्रंवैतन्नवैतन्म
र्त्योजेतुमर्हत्यद्रुक्षोवैमऽआतऽइदंददऽइतिततोहात्यरातिंजा
नंतपिमात्तवीर्यंनिःशुक्रममित्रतपनःशुष्मिणःशैब्योराजा
जघानतस्मादेवंविदुषेब्राह्मणायैवंचक्रुषेनक्षत्रियोद्रुह्येन्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९॥

द्राष्ट्रादवपद्येयंनेद्वामाप्राणोजहदितिजहदिति॥२३॥९॥ ॥

॥इत्यष्टमपंचिकायांचतुर्थोध्यायः॥ ॐम्॥ अथातःपुरोधायाऽ

एवनहवाअपुरोहितस्यराज्ञोदेवाऽअन्नमदंतितस्माद्राजा

यक्ष्यमाणोब्राह्मणंपुरोदधीतदेवामेन्नमदंनित्यग्नींन्वाऽए

षःस्वर्ग्यान्राजोनौद्धरतेयत्पुरोहितंतस्यपुरोहितऽएवाहव

नीयोभवतिजायागार्हपत्यःपुत्रोन्वाहार्यपचनःसयत्पुरोहि

तायकरोत्याहवनीयऽएवतज्जुहोत्यथयज्जायायैकरोति

॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गार्हपत्य एवतज्जुहोत्यथयत्सुचायकरोत्यन्वाहार्यपचनऽएवत्त
जुहोतितऽएनंशांततनवोभिहुताऽअभिप्रीताःस्वर्गंल्लोकमभिव
हंतिक्षत्रंचबलंचराष्ट्रंचविशंचतऽएवैनमशांततनवोनभिहु
ताऽअनभिप्रीताःस्वर्गाल्लोकान्नुदंतेक्षत्राच्चबलाच्चराष्ट्राच्चवि
शश्चाग्निर्वाएषवैश्वानरःपंचमेनिर्यंसुरोहितःसस्यवाच्ये
वैकामेनिर्भवतिपादयोरेकात्वच्येकाहृदयऽएकोपस्थऽएका
ताभिर्ज्वलंतीभिर्दह्यमानाभिरुपोदेतिराजानंसयदाहुकीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

गवोवात्सीस्तृणान्यस्मा आहरतेति तेनास्य तां शमयति यास्य वाचि मे
निर्भवत्यथ यदस्मा उदकमानयंति पाद्यं तेनास्य तां शमयति यास्य
पादयोर्मे निर्भवत्यथ यदेनमलंकुर्वंति तेनास्य तां शमयति यास्य
त्वचि मे निर्भवत्यथ यदेनं तर्पयंति तेनास्य तां शमयति यास्य हृद
ये मे निर्भवत्यथ यदस्यानारुद्धो वेश्मसु वसति तेनास्य तां शमय
ति यास्योपस्थे मे निर्भवति स एनं शांततनुरभिहुतोभिप्रीतः स्व
र्गं लोकमभिवहति क्षत्रं च बलं च राष्ट्रं च विशं च स ऽएवैनमशां

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रन

ततनुभिहुतोनभिप्रीतःस्वर्गाल्लोकांनुदते क्षत्राच्च बलाच्च राष्ट्रा
च्च विशश्च ॥२४॥१॥ अग्निर्वा एष वैश्वानरः पंचमे निर्यत्पुरोहि
तस्ताभी राजं परिगृह्य तिष्ठति समुद्र इव भूमिमयुवमार्यस्य
राष्ट्रं भवति नैनं पुरायुषः प्राणो जहात्याजरसं जीवति सर्वमा
युरेति न पुनर्म्रियते यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहि
तः क्षत्रेण क्षत्रं जयति बलेन बलमश्नुते यस्यैवं विद्वान्ब्राह्मणो
राष्ट्रगोपः पुरोहितस्तस्मै विशः संजानते संमुखा एकमनसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ॰पं॰

॥३१॥

यस्यैवं विद्वाब्राह्मणोराष्ट्रगोपः पुरोहितः॥२५॥२॥तदप्येतदृषि
णोक्तंसऽइंद्राप्रजापतिजन्यातिविश्वाशुष्मेणतस्थावभिवीर्ये
णेतिसपत्नावैद्विषंतोभ्रातृव्याजन्यानितानेवतच्छुष्मेणवीर्येणा
धितिष्ठतिबृहस्पतिंयःसुभृतंबिभर्तीतिबृहस्पतिर्हवैदेवानांपु
रोहितस्तमन्वन्येमनुष्यराज्ञांपुरोहिताबृहस्पतिंयःसुभृतंबि
भर्तीतियदाहपुरोहितंयःसुभृतंबिभर्तीत्येवतदाहवल्गूय
तिवंदतेपूर्वभाजमित्यपचितिमेवास्माऽएतदाहसऽइत्क्षेति

॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुधितऽओकसिस्वऽइतिगृहावाओकःस्वेष्वेवतद्गृहेषुसुहितो
वसतितस्माइळापिन्वतेविश्वदानीमित्यन्नवाऽइळान्नमेवास्माऽ
एतदूर्जःस्वच्छश्वद्भवतितस्मैविशस्वयमेवानमंतऽइतिराष्ट्रा
णिवैविशोराष्ट्राण्येवैनंतत्स्वयमुपनमंतियस्मिन्ब्रह्माराजनि
पूर्वएतीतिपुरोहितमेवैतदाहाप्रतीतोजयतिसंधनानीतिरा
ष्ट्राणिवैधनानितान्यप्रतीतोजयतिप्रतिजन्यान्युतयासज
न्येतिसपत्नावैद्विषंतोभ्रातृव्याजन्यानितानप्रतीतोजयत्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यवेयोवरिवःकृणोतीतियदाहवसीयसेयोवसीयःकरोतीत्येव
तदाहब्रह्मणेराजातमवंतिदेवाइतिपुरोहितमेवैतदभिवद
ति॥२६॥२०॥योहवैत्रीन्पुरोहितांस्त्रीन्पुरोधातत्वेदंसब्राह्मणः
पुरोहितःसवदैतपुरोधायाःअग्निर्वावपुरोहितःपृथिवीपु
रोधातोवायुर्वावपुरोहितोंतरिक्षंपुरोधातादित्योवावपुरोहि
तोद्यौःपुरोधातैषहवैपुरोहितोयएवंवेदाथसनिरोहितोय
एवंवेदतस्यराजामित्रंभवतिद्विषंतमपबाधतैयस्यैवंविद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्ब्राह्मणोराष्ट्रःगोपःपुरोहितःक्षत्रेणक्षत्रंजयतिबलेनबलम
श्नुतेयस्यै॰स्तस्मैविशःसंजानतेसंमुखाएकमनसोयस्यैवं॰तो
भूर्भुवस्वरोममोहमस्मिसत्वंसत्वमस्यमोहंद्यौरहंपृथिवी
त्वंसामाहमृक्त्वंतावेहसंवहावहै॥पुराण्यस्मान्महाभयात्॥
तनूरसितन्वंमेपाहि॥याऽओषधीःसोमराज्ञीर्बह्वीःशतविच
क्षणाः॥तामह्यमस्मिन्नासनेछिद्रंशर्मयछत॥याऽओषधीः
सोमराज्ञीर्विष्ठिताःपृथिवीमनु॥तामह्य॰॥अस्मिन्राष्ट्रेश्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमावेत्रायाम्यतोदेवी प्रतिपत्रयाम्यापः॥दक्षिणंपादमवनेनि
जेस्मिंत्राष्ट्रंद्रियंदधामि॥सव्यंपादमवनेनिजेस्मित्राष्ट्रंद्रि
यंवर्धयामि॥पूर्वमन्यमपरमन्यंपादावधने निजे॥देवाराष्ट्र
स्यगुप्त्याअभयस्यावरुध्ये॥आपःपादावनेजनीर्दिषंतंनि
र्हंतुमे॥२७॥॥अथातोब्रह्मणःपरिमरोयोहवैब्रह्मणःप
रिमरंवेदपर्यैनंद्विषंतोभ्रातृव्याःपरिसपत्नाम्रियंत्तेयंवै
ब्रह्मयोयंपवतेतमेताःपंचदेवताःपरिम्रियंत्तेविद्युद्वृष्टिश्च

सूर्य
॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रमा आदित्योग्निर्विद्युद्वै विद्युत्यवृष्टिमनुप्रविशति सांतर्द्धीयते तां
न निर्जानंति यदा वै म्रियते थांतर्द्धीयते थैनं न निर्जानंति सब्रूयाद्वि
द्युतो मरणे द्विषन्मे म्रियतां सोंतर्द्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं
हैवं न निर्जानंति वृष्टिर्वै वृष्ट्या चंद्रमसमनुप्रविशति सांतर्द्धीयते
तान्न निर्जानंति यदा वै म्रियते थांतर्द्धीयते थैनं न निर्जानंति सब्रू
याद्वृष्टेर्मरणे द्विषन्मे म्रियतां सोंतर्द्धीयतां तं मा निर्ज्ञासिषुरिति
क्षिप्रं हैवैनं न निर्जानंति चंद्रमा वा अमावास्यायामादित्यमनुप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३७॥

विशतिसोंतर्द्धीयतेतन्ननिर्जानंतियदावैम्रियतेथांतर्द्धीयतेथैनं
ननिर्जानंतिसब्रूयाच्चंद्रमसोमरणेद्विषन्मेम्रियतांसोंतर्द्धीय
तांतंमानिर्ज्ञासिषुरितिक्षिप्रंहैवैनंननिर्जानंत्यादित्योवाऽअ
स्तंयंनग्निमनुप्रविशतिसोंतर्द्धीयतेतंननिर्जानंतियदावैम्रि
यतेथांतर्द्धीयतेथैनंननिर्जानंतिसब्रूयादादित्यस्यमरणेद्वि
षन्मेम्रियतांसोंतर्द्धीयतांतंमानिर्ज्ञासिषुरितिक्षिप्रंहैवैनंन
निर्जानंत्यग्निर्वाऽउद्वाचायुमनुप्रविशतिसोंतर्द्धीयतेतंन

॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्जानंतियदावैम्रियतेथांतइत्यतेथेनंननिर्जानंतिसब्रूया
दग्नेर्मरणेनावाएतादेवताअतएवपुनर्जायंतेवायोरग्नि
र्जायतेप्राणाश्चिबलान्मथ्यमानोधिजायतेतंदृष्ट्वाब्रूयाद
ग्निर्जायतांमामेद्विषंजन्यतएवपराङ्प्रजिघ्यत्सियतोहै
वपराङ्प्रजिघ्यग्नेर्वाआदित्योजायतेतंदृष्ट्वाब्रूयादादि
त्योजायतांमामेत्यादित्याद्वैचंद्रमाजायतेतंदृष्ट्वाब्रूयाच्चंद्र
माजायतांमामेचन्द्रमसोवैदृष्टिर्जायतेतांदृष्ट्वाब्रूयादृष्टि

ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३५॥

र्जायतां मा मे॰ वृष्टेर्वै विद्युज्जायते तां दृष्ट्वा ब्रूयाद्विद्युज्जायतां मा
मे॰ स ऽ एष ब्रह्मणः परिमरस्तमेतं ब्रह्मणः परिमरं मैत्रेयः
कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच तं ह पं
च राजानः परिमम्रुः स्ततसुत्वा महज्जगाम तस्य व्रतं न द्विष
तः पूर्व ऽ उपविशेद्यदि तिष्ठंतं मन्येत तिष्ठेतैव न द्विषतः पूर्वः
संविशेद्यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद्य
दि जाग्रतं मन्येत जाग्रियादेवापि ह यद्यस्याश्ममूर्द्धा द्विषन्भ

॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३६॥

वति क्षिप्रं हैवैनं स्तृणुते स्तृणुते ॥२८॥५॥ ॥इत्यष्टमपंचि
कायां पंचमोध्यायः॥ ॥शिवराम्॥ शाके १७१९ वर्षे पिंगल
नामसंवत्सरे दक्षिणायने हैमंतऋतु मार्गशीर्ष शुद्ध चतुर्द
शी भानुवासरे तद्दिने पुस्तकं संपूर्णं॥ ॥सूर्यनारायण॥
ढोबळोपनाम्ना काशिनाथभट्टस्य सूतेन सदाशिवेन
लिख्यते॥ समाप्तं॥ शुभं भवतु॥ आत्मार्थं परोपकारार्थं॥

॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.20 12:16
,TRANSFERRED=2020/07/24 at 12:25:04
,PAGES=73
,TYPE=STD
,NAME=S0003365
,Book Name=M-2645-ROTREM BRAHAMAN ASHTAM PANCHIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection